# Sanskrit Slokas for Children

Compiled by Swamini Svatmabodhananda



Arsha Avinash Foundation
104 Third Street, Tatabad, Coimbatore 641012, India
Phone: + 91 9487373635
E mail: arshaavinash@gmail.com
www.arshaavinash.in

*Sanskrit series - 4*

# श्लोक सङ्ग्रहः

# *Śloka sangraha:*

**Selected Sanskrit *ślokas* from various *granthas***

**to teach children and commit to memory**

*Compiled by*

**Swamini Svatmabodhananda Saraswati**

Bangalore

(svatmabodha@yahoo.co.in)

**Why this compilation?**

This book is meant for teachers/elders to help children memorize the *shlokas*.It has already reached a number of children in Bangalore, Sringeri and Mysore through a couple of centers with which I am connected.

Reading someone else's typo errors and correcting the same is a laborious job. I thank Brahmasri. Chandrakantha Sharma, Brni. Arathi and Smt. Purnima Prasad, all from Bangalore who have contributed their efforts by complying to my request for proof reading the content.

This compilation will be made available in Roman Transliteration, Kannada and Tamil.

(If the readers find any typo errors please feel free to let me know by email [svatmabodha@yahoo.co.in])

Swamini Svatmabodhananda Saraswati

(Disciple of Swami Dayananda Saraswati

ArshaVidyaGurukulam)

kārtikapūrnimā - 2016



**या वर्ण–पद-वाक्यार्थ-गद्य-पद्य-स्वरूपिणी ।**

**वाचि नर्तयतु क्षिप्रं मेधां देवि सरस्वती।।**

ओं नमः श्री शब्दब्रह्मात्मने श्री नटराजराजाय नमः।

ओं नमः श्री शब्दविद्या सम्प्रदाय कर्तृभ्यो नमो महद्भ्यो नमो गुरुभ्यः ।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।

जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥

## *श्लोक सङ्ग्रहः*

**भारतमाता स्तुतिः (विष्णु पुराण ३ अध्यय अंश २)**

१.उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।

वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥

२.तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्वनः ।

दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥

३.अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ।

यतो हि कर्मभूरेषा ह्यतोन्या भोगभूमयः ॥

**उदयनाचार्य – हरि स्तुतिः***(universal Prayer)*

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनः ।

बौद्धाबुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ॥

अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः ।

सोऽयं वै विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥

**Getting up in the morning on the bed**

Looking at the palms in *anjalimudra* seeking the blessings of the three *śaktis*for the day

कराग्रे वसते लक्ष्मीः कर मध्ये सरस्वती ।

कर मूले स्थिता गौरी प्रभाते करदर्शनम् ॥

**What to first see after getting up from bed?**

१.कपिलान्दर्पणं भानुं भाग्यवन्तं च भूपतिम् ।

आचार्यम् अन्नदातारं प्रातःपश्येत् पवित्रताम् ॥

**Getting out of bed and while placing the feet on the ground**

समुद्रवसने देवि पर्वतस्तनमण्डले ।

विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

**Prayers to the waters before bathing**

1. गङ्गेचयमुनेचैवगोदावरिसरस्वति।

नर्मदेसिन्धुकावीजलेऽस्मिन्सन्निधिंकुरु॥

2. गोविन्देति सदा स्नानं गोविन्देति सदा जपम् ।

गोविन्देति सदा ध्यानं सदा गोविन्द कीर्तनम् ॥

3. गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा ।

कृष्णा भीमरती च पल्गु सरयूः श्री गण्डकी गोमती ।

कावेरी कपिला प्रयागविनता नेत्रावतीत्यादयोः ।

नद्यः श्रीहरिपादपङ्कजभवाः कुर्वन्तु तेमङ्गलम् ॥

**सूर्यस्तुतिः**Salutations to *Sūrya*

१.भानो भास्कर मार्ताण्ड चण्ड रश्मि दिवाकर ।

आयुरारोग्यम् ऐश्वर्यं विद्यांदेहि नमोऽस्तुते ॥

२.उदये ब्रह्मरूपोऽयं मध्याह्ने तु महेश्वरः ।

अस्तमाने स्वयं विष्णुः त्रयीमूर्तिर्दिवाकरः ॥

३.आदिदेव  नमस्तुभ्यं प्रसीद मम भास्कर ।

दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥

४. ध्येयस्सदा सवितृमण्डलमध्यवर्ती

नारयणः सरसिजासन सन्निविष्टः ।

केयूरवान् मकरकुण्डलवान्

किरीटी हारी हिरण्मयवपुः धृतशङ्खचक्रः ॥

शङ्खचक्रगदापाणेद्वारकान्निलयाच्युत।

गोविन्दपुण्डरीकाक्षारक्षमांशरणागतम्॥

## सूर्यद्वादशनामानि नमस्कारस्तुतिः

ओं मित्राय नमः । ओं रवये नमः । ओं सूर्याय नमः । ओं भानवे नमः । ओं खगाय नमः ।ओं पूष्णे नमः । ओं हिरण्यगर्भाय नमः । ओं मरीचये नमः । ओं आदित्याय नमः ।ओं सवित्रे नमः । ओं अर्काय नमः । ओं भास्कराय नमः ॥

## रथसप्तमीस्नान समये

सप्त सप्त महासप्त सप्तद्वीपा वसुन्धरा ।

सप्तार्क पर्णमादाय सप्तम्यां स्नानमाचरेत् ॥

Salutations to the parents

मातापितृभ्यां वपुषः जनकाभ्यां मुदान्वहम् ।

नमस्करोमि विज्ञानजनकाभ्यां शिवाप्तये ॥

At the altar - morning/evening

## दीप उज्ज्वलनम्

१.असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मा

अमृतङ्गमय ॥ओं शान्तिः शान्तिः शान्तिः ॥

२.शुभं करोति कल्याणं आरोग्यं धन सम्पदः ।

शत्रुबुद्धि विनाशाय दीपज्योतिर्नमोऽस्तुते ॥

३.दीपज्योतिः परं ब्रह्म दीपज्योतिर्जनार्दनः ।

दीपो हरतु मे पापं दीपज्योतिर्नमोऽस्तुते ॥

४.दीपमूले स्थितो ब्रह्मा दीपमध्ये जनार्दनः ।

दीपाग्रे शङ्करः प्रोक्तः सन्ध्यादीप नमोऽस्तुते ॥

Before eating

१. अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।

ज्ञान वैराग्य सिद्ध्यर्थं भिक्षां देहि च पार्वति ॥

२. अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।

प्राणापान समायुक्तः पचाम्यन्नं चतुर्विधम् ॥

३. ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।

ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म समाधिना ॥

ओं शान्तिः शान्तिः शान्तिः

Before going to bed

१. रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् ।

शयने यः स्मरेन्नित्यं दुःस्वप्नं तस्य नश्यति ॥

२. अगस्त्यो माधवश्चैव मुचुकुन्दो महाबलः ।

कपिलो निमिरास्तीकः सप्तैते सुखशायिनः ॥

३. ब्रह्माणं शङ्करं विष्णुं यमं रामं धनुं बलिम् ।

सप्तैतान् यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति ॥

While taking medicine

१.शरीरे जर्जरीभूते व्याधिग्रस्ते कलेबरे ।

औषधं जाह्नवी तोयं वैद्यो नारायणो हरिः ॥

२.धन्वतरिं गरुत्मन्तं फणीराजं च कौस्तुभम् ।

अच्युतं चामृतं चन्द्रं स्मरेदौषधकर्मणि ॥

## धन्वन्तरि

अच्युतानन्द गोविन्द विष्णो नारायणामृत ।

रोगान्मे नाशयाशेषान् आशु धन्वन्तरे हरे ॥

**ओं धं धन्वन्तरये नमः**॥

To remove fear of lightening in Children

अर्जुनःफल्गुणः पार्थः किरीटी श्वेतवाहनः ।

बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥

To ward off the ill effects of

*Candradarśanam* on *Vināyakacaturthi*

सिंहः प्रसेनमवधीः सिंहो जाम्बवता हतः ।

सुकुमारक मारोदीः तवह्येषः स्यमन्तकः ॥

**गणपति ध्यानम्**

१. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनंध्यायेत् सर्वविघ्नोपशान्तये ॥

2. एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।

पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम् ॥

3.मूषिकवाहन मोदक हस्त चामरकर्ण विलम्बित सूत्र ।

वामनरूपमहेश्वर पुत्र विघ्नविनायक पाद नमस्ते ॥

4. ध्यायेद् गजाननं देवं तप्तकाञ्चन सन्निभं ।

चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥

5. श्रीकान्तो मातुलो यस्य जननी सर्वमङ्गला ।

जनकः शङ्करो देवः तं वन्दे कुञ्जराननम् ॥

6. वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभा ।

निर्विघ्नं कुरु मे देवा सर्वकार्येषु सर्वदा ॥

7. अगजाननपद्मार्कं गजाननमहर्निशम् ।

अनेकदं तं भक्तानां एकदन्तमुपास्महे ॥

8. गजाननं भूतगणादिसेवितं कपित्थजम्बूफलसारभक्षितम् ।

उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम् ॥ 9.

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।

भक्तावासं स्मरेन्नित्यमायुःकामार्थसिद्धये ॥

10. ओं गणानां त्वा गणपतिग्ँ हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥ ओं महागणाधिपतये नमः ॥ ओं शान्तिः शान्तिः शान्तिः ॥

## सरस्वति/वाग्देवी ध्यानम्

१. भारतीं भावये देवीं भाषाणां अधिदेवताम् ।

भावितां हृदये सद्भिः भामिनीं परमेष्ठिनः ॥

२. या वर्ण–पद-वाक्यार्थ-गद्य-पद्य-स्वरूपिणी ।

वाचि नर्तयतु क्षिप्रं मेधादेवी सरस्वती ।।

३. सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।

विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

४. या कुन्देन्दु-तुषारहार-धवला या शुभ्र-वस्त्रान्विता

या वीणा-वरदण्ड-मण्डितकरा या श्वेतपद्मासना ।

या ब्रह्माच्युत-शङ्कर-प्रभृतिभिर्देवैस्सदा पूजिता

सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥

५. या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः ।

सा मे वसतु जिह्वाग्रे ब्रह्म रूपा सरस्वती ॥

६. दोर्भिर्युक्ता चतुर्भिःस्फटिकमणिमयीम् अक्षमालां दधाना

हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।

भासाकुन्देन्दु-शङ्खस्फटिक-मणिनिभा भासमाना समाना

सा मे वाग्देवतेयं निवसतु-वदने सर्वदा सुप्रसन्ना ॥

७. नमस्ते शारदे देवि काश्मीर-पुरवासिनि ।

त्वामहं प्रार्थये नित्यं विद्यां बुद्धिं च देहि मे ॥

८. शारदा शारदाम्बोजवदना वदनाम्बुजे ।

सर्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात् ॥

९. प्रणोदेवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ।ओं

श्री वाग्देव्यै नमः ॥

## स्कन्धपुराणे ईश्वर स्तुति (१.२.२९.१२६)

त्वं परमं तेजो मङ्गलानां च मङ्गलम् ।

अप्रमेयगुणश्चैव मन्त्राणां मन्त्रगो भवान् ॥

**गुरुवन्दनम्**

१. गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।

गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

२. अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।

तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥

3. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।

चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥

**ब्रह्मवैवर्त पुराणे गुरु प्रार्थना (४.३०.४३)**

जगद्गुरो नमस्तुभ्यं शिवाय शिवदाय च ।

योगीन्द्राणां च योगीन्द्रं गुरूणां गुरवे नमः ॥

**गुरुपरम्परावन्दनम्**

१. सदाशिव समारम्भां शङ्कराचार्य मध्यमां ।

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

२. श्रीदक्षिणामूर्तिसुदेशिकेन्द्रं द्वैपायनं सूत्रकृतं मुनीन्द्रम् ।

श्रीशङ्करं भाष्यकृतं यतीन्द्रं मद्देशिकं चापि नमामि वित्त्यै ॥

**दक्षिणामूर्ति मन्त्रः**

१. ओं ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ध्यानैक निरताङ्गाय

नमो रुद्राय शम्भवे ह्रीं ओं ॥

**२.** ओं नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा

**दक्षिणामूर्ति स्तोत्रम्**

१. ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।

व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

२. निधये सर्वविद्यानां भिषजे भवरोगिणां ।

गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥

३. ओं नमः प्रणवार्थाय शुद्धज्ञानैक मूर्तये ।

निर्मलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥

## वेदव्यास वन्दनम्

१. व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।

पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ।

२. व्यासाय विष्णु रूपाय व्यास रूपाय विष्णवे ।

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

३. अविकाराय शुद्धाय नित्याय परमात्मने ।

सदैक रूपरूपाय विष्णवे सर्वजिष्णवे ॥

४. कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतम् ।

वेदान्तभास्करं वन्दे शमादिनिलयं मुनिम् ॥

५. अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।

अफाललोचनः शम्भुः भगवान् बादरायणः ॥

## आदि शङ्कराचार्य वन्दनम्

१. श्रुति स्मृति पुराणानामालयं करुणालयम् ।

नमामि भगवत्पाद शङ्करं लोक शङ्करम् ॥

२. शङ्कारूपेण मच्चित्तं  पङ्कीकृतमभूद्यया

किङ्करी यस्य सा माया शङ्कराचार्य माश्रये ।

३. शङ्करं शङ्कराचार्यं केशवं बादरायणं ।

सूत्र भाष्य कृतौ वन्दे भगवन्तौ पुनः पुनः ॥

४. अवतीर्णश्च कालट्यां केदारेऽन्तर्हितश्च यः ।

चतुष्पीठप्रतिष्ठाता जयताच्छङ्करो गुरुः ॥

५. नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत् पुत्र पराशरं च ।

व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्

६. श्री शङ्कराचार्यमथास्य पद्म पादं च हस्तामलकं च शिष्यम् ।

तं तोटकं वार्तिककारमन्यान् अस्मद्गुरून् सन्ततमानतोऽस्मि

श्री शङ्कराचार्य वर्याय नमः ॥

**प्रातः स्मरणीयः सुप्रभात स्तुतिः**

१. ब्रह्मामुरारिस्-त्रिपुरान्तकश्च भानुः शशी भूमिपुत्रो बुधश्च ।

गुरुश्च शुक्रः शनि राहु केतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

२. भृगुर्वसिष्ठः क्रतुरङ्गिरश्च मनुः पुलस्त्यः पुलहश्चगौतमः ।

दाल्भ्यो मरीचिः च्यवनोऽथ दक्षः कुर्वन्तु सर्वे मम सुप्रभातम्

३. सनत्कुमारश्च सनन्दनश्च सनातनोऽप्यसूरि सिंहकौ च ।

सप्तस्वरः सप्तरसस्थलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥

४. सप्तार्णवः सप्तकुलाचलश्च सप्तर्षयो द्वीप वनानि सप्त ।

भूरादि कूर्मो भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥

५. पृथिवी सगन्धा सरसः तथापः स्पर्शश्च वायुर्ज्वलितं च तेजः

नभः सशब्दं महता सहैव कुर्वन्तु सर्वे मम सुप्रभातम् ॥

६. प्रह्लाद-नारदपराशर-पुण्डरीक व्यासाम्बरीश शुक शौनक भीष्मभ्यात् ।

रुक्माङ्गदार्जुनविभीषणादीन् पुण्यानिमान् परम भागवतान् स्मरामि ॥

७. पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।

पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥

८. ब्रह्माणं शङ्करं विष्णुं यमं रामं धनुं बलिम् ।

सप्तैतान् स्मरेन्नित्यं महापातक नाशनम् ॥

९. अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।

पञ्चकन्याः स्मरेन्नित्यं महापातक नाशनम् ॥

१०. कार्कोटकस्य नागस्य दमयन्त्याः नलस्य च ।

ऋतुपर्णस्य राजर्षेः कीर्तनं कलि नाशनम् ॥

११. प्रातः प्रभृति सायान्तं शयनादि प्रातरन्तान्तः ।

यद्यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ॥

१२. इत्थं प्रभाते परमं पवित्रं पठेत् स्मरेद् वा श्रुण्वश्च तद्वत्

दुस्स्वप्न नाशस्त्विह सुप्रभातं भवेत् च नित्यम्

भगवत्प्रसादात् ॥

## श्रुति उक्त गायत्री मन्त्रः

ओं भूर्भुवः स्वः तत् सवितुर्वरेण्यं भर्गोदेवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥

**स्मृति उक्त गायत्री  मन्त्रः / स्मार्त गायत्री**

योो देवः सवितास्माकं धियो धर्मादि गोचरे ।

प्रेरयेत् तस्य यद् भर्गः तद्वरेण्यं उपास्महे ॥

**शान्ति पाठः**

१. ओं सहनाववतु । सहनौ भुनक्तु । सहवीर्यं करवावहै ।

तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः ॥

२. ओं भद्रं नोऽपिवातय मनः ॥

ओं शान्तिः शान्तिः शान्तिः ॥

३. ओं भद्रं कर्णेभिः श्रृणुयाम देवाः । भद्रं पश्ये माक्षभिर्यजत्राः

।स्तिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।

स्वस्तिन इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति

नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ ओं

शान्तिः शान्तिः शान्तिः ॥

४. ओं पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय

पूर्णमेवावशिष्यते । ओं शान्तिः शान्तिः शान्तिः ॥

**मृत्युञ्जय मन्त्रः**

ओं त्र्यम्बकं यजामाहे सुगन्धिं पुष्टिवर्धनं ।उर्वारुकमिव

बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ओं शान्तिः शान्तिः शान्तिः ॥

**शिवस्तुतिः**

१. वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणम् ।

वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ॥

वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियम् ।

वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

२. नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानन्दमूर्ते ।

नमस्ते नमस्ते तपोयोगगम्यनमस्ते नमस्ते श्रुतिज्ञानगम्य ॥

३. शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम् ।

शिवमार्गप्रणेतारं प्रणतोऽस्मि सदाशिवम् ॥

४.मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।

अमृतेशाय शर्वाय महादेवाय ते नमः ॥

५. साम्बो नः कुलदैवतं पशुपते साम्ब त्वदीया वयम्

साम्बं स्तौमि सुरासुरोरगगणाः साम्बेन सन्तारिताः ।

साम्बायास्तु नमो मया विरचितं साम्बात्परं नो भजे

साम्बस्यानुचरोऽस्म्यहं मम रतिः साम्बे परब्रह्मणि ॥

## शिव मानस पूजा

१.आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहम् ।

पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ॥

सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणिसर्वागिरः ।

यद्यत्कर्मकरोमि तत्तदखिलं शम्भो तवाराधनम् ॥

२.कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।

सदा वसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि ॥

## द्वादशलिङ्गस्तोत्रम्

सौराष्ट्रदेशे सोमनाथञ्च श्रीशैले मल्लिकार्जुनम् ।

उज्जयिन्यां महाकालमोङ्कारममलेश्वरम् ॥

परल्यां वैद्यनाथञ्च डाकिन्यां भीमशङ्करम् ।

सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥

वाराणस्यां तु विश्वेशं त्र्यम्बकं गोतमि तटे ।

हिमालये तु केदारं घुश्मेशं तु शिवालये ॥

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।

सप्तजन्म कृतं पापं स्मरणेन विनश्यति ॥

## लिङ्गस्तुतिः

ज्योतिर्मात्रस्वरूपाय निर्मलज्ञानचक्षुषे ।

नमः शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥

## बिल्व स्तुतिः

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।

त्रिजन्मपाप संहारमेकबिल्वं शिवार्पणम् ॥

## बिल्व चिन्वन-श्लोकः

१. नमस्ते बिल्वतरवे श्रीफलोदय-हेतवे ।

स्वर्गापवर्ग-रूपाय नमो मूर्ति-त्रयात्मने ॥

२. संसार-विष-वैद्यस्य साम्बस्य करुणानिधेः ।

अर्चनार्थं गृहीष्यामि त्वत्पत्रं तत्क्षम्स्व मे ॥

## गौरी जपः

ओं नमश्शिवकान्तायै ह्रीं नमः शिवश्शक्त्यै ।

श्रीं नमो जगतां वन्द्यै मम भूयान्मनोरथः ॥

## दुर्गा

१. नमस्ते शरण्ये शिवे सानुकम्पे  नमस्ते जगद्व्यापिके विश्वरूपे

नमस्ते जगद्वन्द्य पादारविन्दे नमस्ते जगत्तारिणि त्राहि दुर्गे

**रोगविनाशनम्**

१.रोगानशेषान् अपहंसि तुष्टा

रूष्टा तु कामान् सकलानभीष्टान् ।

त्वामाश्रितानां न विपन्नराणां

त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

**विद्या प्रधान स्तुतिः**

**1. विद्यासु शास्त्रेषु विवेकदीपेषु आद्येषु वाक्येषु च का त्वदन्या।**

**ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्ववम् ॥**

**भयनाशनम्**

१.दुर्गे स्मृता हरसि भीतिमशेषजन्तोः

स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

दारिद्र्य-दुःखभय हारिणि का त्वदन्या

सर्वोपकार करणाय सदार्द्रचित्ता ॥

# देवी

१. जपो जल्पः शिल्पं सकलमपि मुद्रा विरचना

गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।

प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा

सपर्यापर्यास्तव भवतु यन्मे विलसितम् ॥

(२७ सौन्दर्यलहरि)

२. शरणागतदीनार्त परित्राणपरायणे ।

सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तुते ॥

३. आयुर्देहि धनं देहि विद्यां देहि महेश्वरि ।

समस्तमखिलं देवि देहि मे परमेश्वरि ॥

४. या देवी सर्व भूतेषु शक्ति रूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

५. या देवी सर्व भूतेषु लक्ष्मी रूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

६.या देवी सर्व भूतेषु बुद्धि रूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

७.या देवी सर्व भूतेषु श्रद्धा रूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

८.या देवी सर्व भूतेषु मातृ रूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

९.श्रीः स्वयं सर्वतीर्थात्मिके, सर्वमन्त्रात्मिके, सर्वतत्त्वात्मिके, सर्वमुद्रात्मिके, सर्वपीठात्मके, सर्वशक्त्यात्मिके, सर्वचक्रात्मिके, सर्ववर्णात्मिके, सर्वविद्यात्मिके, सर्वयोगात्मिके, सर्वनादात्मिके, सर्वशब्दात्मिके, सर्वविश्वात्मिके, सर्वदीक्षात्मिके, सर्वसर्वात्मिके, सर्वगे हे जगन्मातृके पाहि मां पाहि मां पाहि मां देवि,तुभ्यं नमो देवि, तुभ्यं नमो देवि, तुभ्यं नमः ॥ (कालिदासः)

## शिव –पार्वतीस्तुतिः (कालिदास रचितम्)

वागर्थाविव सम्पृक्तौ वागर्थ प्रतिपत्तये ।

जगतः पितरौ वन्दे पार्वती-परमेश्वरौ ॥

## सुब्रह्मण्य वन्दनम्

१.मयूराधिरूढं महावाक्यगूढं मनोहारिदेहं महच्चित्तगेहं ।

महीदेवदेवं महावेदभावं महादेवबालं भजेलोकपालम् ॥

२.षडाननं कुङ्कुमरक्तवर्णं महामतिं दिव्यमयूरवाहनम् ।

रुद्रस्य सूनुं सुरयूथनाथं गुहं सदाहं शरणं प्रपद्ये ॥

## नारायण स्तुतिः

नमामि नारायण पादपङ्कजं करोमि नारायणपूजनं सदा ।

वदामि नारायणनाम निर्मलं स्मरामि नारायण तत्त्वमव्ययम् ॥

## विष्णु स्तुतिः

१.वनमाली गदीशार्ङ्गी शङ्खीचक्री च नन्दकी ।

श्रीमान्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥

२. शान्ताकारं भुजगशयनम् पद्मनाभं सुरेशम्

विश्वाधारं गगन सदृशं मेघवर्णं शुभाङ्गम् ।

लक्ष्मीकान्तं कमलनयनं योगिहृध्यानगम्यम्

वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

३. भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे

कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।

अन्तस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः

चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥

४. सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।

सहारवक्षस्थलशोभिकौस्तुभंनमामि विष्णुं शिरसाचतुर्भुजम् ॥

## महालक्ष्मी स्तुतिः

१. नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।

शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥

२. सरसिजनिलये सरोज हस्ते

धवलतमां शुकगन्धमाल्यशोभे ।

भगवति हरिवल्लभे मनोज्ञे

त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

३. वक्त्राब्जे भाग्यलक्ष्मीः करतलकमले सर्वदा धान्यलक्ष्मीः

दोर्दण्डे वीरलक्ष्मीः हृदयसरसिजे भूतकारुण्य लक्ष्मीः ।

खड्गाग्रे शौर्यलक्ष्मीः निखिलगुणगणाडम्बरे कीर्तिलक्ष्मीः

सर्वाङ्गे सौम्यलक्ष्मीः सपदि भवतु मे धर्ममोक्षार्थसिद्ध्यै ॥

४. वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदाम्

हस्ताभ्यां अभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।

भक्ताभीष्टफलप्रदां हरि-हर-ब्रह्मादिभिः सेविताम्

पार्श्वे पङ्कज-शङ्खपद्म-निधिभिर्युक्तां सदा शक्तिभिः ॥

५. नमोऽस्तु नाळिकनिभाननायैनमोऽस्तु नारायणवल्लभायै ।

नमोऽस्तु रत्नाकर सम्भवायै नमोऽस्तु लक्ष्म्यै जगतां जनन्यै ॥

६. लक्ष्मीं क्षीरसमुद्र-राज-तनयां श्रीरङ्गधामेश्वरीम्

दासीभूत-समस्तदेव-वनितां लोकैकदीपाङ्कुराम् ।

श्रीमन्मन्द्-कटाक्ष-लब्धविभव-ब्रह्मेन्द्र-गङ्गाधराम्

त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

७. सिद्धलक्ष्मीर-मोक्षलक्ष्मीर्-जयलक्ष्मीः सरस्वती ।

श्रीलक्ष्मीर्-वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥

८. या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी

गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।

लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगण-खचितैः स्नापिता हेमकुम्भैः

नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

## हयग्रीव स्तुतिः

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।

आधारं सर्व विद्यानां हयग्रीवमुपास्महे ॥

**हरि प्रार्थना (ब्रह्मपुराणम् अध्यायः १)**

यं ध्यान्ति बुधाः समाधिसमये शुद्धं वियत्सन्निभम् ।
नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणम् ॥
व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं विभुम् ।
तं संसारविनाशहेतुमजरं वन्दे हरिं मुक्तिदम् ॥

**श्रीराम**

१. रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

२. आर्तानां आर्तिहन्तारं भीतानां भयनाशनम् ।
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥

३. रामो राजमणिः सदा विजयते रामं रमेशंभजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥

४.श्री राघवं दशरथात्मजमप्रमेयम्

सीतापतिं रघुकुलान्वय रत्नदीपम् ।

आजानुबाहुं अरविन्ददलायताक्षम्

रामं निशाचरविनाशकरं नमामि ॥

५.वैदेही सहितं सुरद्रुमतले हैमे महामण्डपे

मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनीन्द्रैः परम्

व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

६.श्रीराम राम रघुनन्दन राम राम

श्रीराम राम भरताग्रज राम राम ।

श्रीराम राम रणकर्कश राम राम

श्रीराम राम शरणं भव राम राम ॥

७.श्री राम राम रामेति रमे रामे मनोरमे ।

सहस्रनाम तत्तुल्यं रामनाम नमोऽस्तुते ॥

८. श्रीरामचन्द्र –चरणौ मनसा स्मरामि

श्रीरामचन्द्र –चरणौ वचसा गृणामि ।

श्रीरामचन्द्र –चरणौ शिरसा नमामि

श्रीरामचन्द्र –चरणौ शरणं प्रपद्ये ॥

९. माता रामो मत्पिता रामचन्द्रः

स्वामी रामो मत्सखा रामचन्द्रः ।

सर्वस्वं मे रामचन्द्रो दयालुः

नान्यं दैवं नैव जाने न जाने ॥

१०. वामे भूमिसुता पुरस्तु हनुमान् पश्चात् सुमित्रासुतः

शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषुच ।

सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्

मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥

## रामायणप्रार्थना

१.वाल्मीकि-गिरिसम्भूता राम-सागर-गामिनी ।

पुनातु भुवनं पुण्या रामायण महानदी ॥

२.वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।

वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥

३.चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।

एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥

*Kausalya's blessings to Lord Rama before he leaves for the forest - this should be every mothers blessing to the children everyday.*

१.रामाय रामभद्राय रामचन्द्राय वेधसे ।

रघुनाथाय नाथाय सीतायाः पतये नमः ॥

2. यन्मङ्गलं सहस्राक्षे सर्वदेव नमस्कृते ।

वृत्रनाशे समभवत् तत्ते भवतु मङ्गलम् ॥

3.यन्मङ्गलं सुपर्णस्य विनताकल्पयत् पुरा ।

अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥

4. अमृतोत्पादेन दैत्यान् घ्नतो वज्रधरस्य यत् ।

अदितिर्मङ्गलं प्रादात् तत्ते भवतु मङ्गलम् ॥

5. त्रीन् विक्रमान् प्रक्रमतो विष्णोरमिततेजसः ।

यदासीन्मङ्गलं राम तत्ते भवतु मङ्गलम् ॥

6. ऋतवः सागरा द्वीपा वेदा लोका दिशश्च ये ।

मङ्गलानि महाबाहो दिशन्तु तव सर्वदा ॥

**वाल्मीकि *first shloka* – रामायणकाव्य कारण श्लोकः**

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

यत्क्रौञ्चमिथुनादेकम् अवधीः काममोहितं ॥ (रामयण १.२.१५)

**वाल्मीकि वन्दनम्**

१.कूजन्तं राम रामेति मधुरं मधुराक्षरं ।

आरुह्यकविताशाखां वन्दे वाल्मीकि कोकिलम् ॥

२. यः पिबन् सततम् रामचरितामृतसागरम् ।

अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥

३. वाल्मीकेर्मुनिसिंहस्य कविता वनचारिणः ।

श्रृण्वन् रामकथानादं को न याति परां गतिम् ॥

**हनूमान् स्तुतिः**

१. बुद्धिर्बलं यशो धैर्यं निर्भयत्वम् अरोगता ।

अजाढ्यं वाक्पटुत्वं च हनूमत् स्मरणाद्भवेत् ॥

2. असाध्यसाधक स्वामिन् असाध्यं तव किं वद ।

रामदूत कृपासिन्धो मत्कार्यं साधय प्रभो ॥

**२.** मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

**श्रीकृष्ण स्तुतिः**

१. कृष्णाय वासुदेवाय देवकी नन्दनाय च ।

नन्दगोप कुमाराय गोविन्दाय नमो नमः

२. हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते

हे कंसान्तक हे गजेन्द्र करुणापारीण हे माधव ।

हे रामानुज हे जगत्रयगुरो हे पुण्डरीकाक्ष माम्

हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥

३. प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।

ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥

४. वसुदेवसुतं देवं कंसचाणूर मर्दनम् ।

देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

५. मूकं करोति वाचालं पङ्गुंलङ्घयते गिरिम् ।

यत्कृपा तमहं वन्दे परमानन्द माधवम् ॥

६. कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमध्वं सदा

कृष्णेनाखिलशत्रवो विनिहताः कृष्णाय तस्मै नमः ।

कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहम्

कृष्णे तिष्ठति विश्वमेतदखिलं हे कृष्ण रक्षस्व माम् ॥

७.करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।

वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥

८.सर्वोपनिषदो गावो दोग्धा गोपाल नन्दनः ।

पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

९.सच्चिदानन्दरूपाय कृष्णायाक्लिष्टहारिणे ।

नमो वेदान्त वेद्याय गुरवे बुद्धिसाक्षिणे ॥

१०. श्री कृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव ।

**गोकुलाष्टमी स्तुतिः**

१.जातः कंसवधार्थाय भूभारोत्तरणाय च ।

दानवानां विनाशाय वसुदेवकुलोद्भवः ॥ श्रीकृष्णाय नमः ॥

२.पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ।

कौरवाणां विनाशाय वसुदेव कुलोद्भवः ॥ श्रीकृष्णाय नमः ॥

३.श्रावण्यां कृष्णपक्षे तु अष्टम्यां रोहिणीयुते ।

तस्यां चन्द्रोदये रात्रौ बालकृष्णसमुद्भवः॥श्रीकृष्णाय नमः ॥

## अश्वत्थवृक्षवन्दनम्

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।

अग्रतः शिवरूपाय वृक्षराजाय ते नमः ॥

## इन्द्राक्षी स्तोत्रम्

१. इन्द्राक्षीं द्विभुजादेवीं वन्दे वस्त्रद्वयान्विताम् ।

वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

२. इन्द्राक्षीं युवतिं देवीं नानालङ्कारभूषिताम् ।

प्रसन्नवदनाम्बोजां अप्सरोगणसेविताम् ॥

## तुलसी स्तुतिः

१. नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।

नमो मोक्षप्रदे देवि नमः सम्पत् प्रदायिनी ॥

२. गायत्रीं तुलसीं गङ्गां कामधेनुं अरुन्धतीम् ।

पञ्चमातृः स्मरेन्नित्यं महापातकनाशनम् ॥

## तुलसी नमस्कारः

यन्मूले सर्वतीर्थानि यन्मध्ये सर्व देवताः ।

यदग्रे सर्ववेदाश्च तुलसि त्वां नमाम्यहम् ॥

## तुलसी चिन्वन-श्लोकः

१. तुस्यमृत-सम्भूते सदा त्वं केशव-प्रिये ।

केशवार्थं लुनामि त्वां वरदा भव शोभने ॥

२. प्रसीद मम देवेशि प्रसीद हरिवल्लभे ।

क्षीरोद-मथनोद्भूते तुलसि त्वं प्रसीद मे ॥

## वेङ्कटेश्वर स्तुतिः

कल्याणाद्भुतगात्राय कामितार्थप्रदायिने ।

श्रीमद्वेङ्कटनाथाय श्रीनिवासाय ते नमः ॥

## नवग्रह स्मरणम्

१. नमः सूर्याय चन्द्राय मङ्गलाय बुधाय च ।

गुरु शुक्रशनिभ्यश्च राहवे केतवे नमः ॥

२. आरोग्यं प्रददातु नो दिनकरः चन्द्रो यशो निर्मलम् ।
भूतिं भूमिसुतस्सुधांशुतनयः प्रज्ञां गुरुर्गौरवम् ।
काव्यः कोमलवाग्विलासमतुलं मन्दो मुदं सर्वदा ।
राहुर्बाहुबलम् विरोधिशमनं केतुः कुलस्योन्नतिम् ॥

## गुरुवायूरप्पा ध्यानम्

पीताम्बरं करविराजित शङ्खचक्र
कौमोदकी सरसिजं करुणासमुद्रम् ।
राधासहायमति सुन्दर मन्दहासं
वातालयेशमनिशं हृदि भावयामि ॥
हरे श्री गुरुरुपवनपुरपते शरणम् ॥

## गरुड दर्शनम्

कुङ्कुमाङ्कितवर्णाय कुन्देन्दुधवलाय च ।
विष्णुवाहन नमस्तुभ्यं पक्षिराजाय ते नमः ॥

## *Selected verse from* **नारायणीयम्**

गङ्गा गीता च गायत्र्यपि च तुलसिका गोपिका चन्दनं तत्

सालग्रामाभिपूजा परपुरुष तथैकादशी नामवर्णाः ।

एतान्यष्टाप्य यत्नान्ययि कलिसमये त्वत्प्रसादात् प्रवृघ्या

क्षिप्रं मुक्तिप्रधानीत्यभिदधु ऋषयः तेषु मां सञ्जयेथाः ॥

## श्री शास्ता/ ऐय्यप्पा स्तुतिः

१. लोकवीरं महापूज्यं सर्वरक्षाकरं विभुम् ।

पार्वतीहृदयानन्दं शास्तारं प्रणमाम्यहम् ॥

२. भूतनाथ सदानन्द सर्वभूत दयापर ।

रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमो नमः ॥

स्वामिये शरणं ऐय्यप्पा ॥

## शालिग्रामवन्दनम्

शालिग्रामशिलावारि पापहारी विशेषतः ।

आजन्मकृतपापानां प्रायश्चित्तं दिने दिने ॥

**While giving grass to the cow**

सुरभिर्वैष्णवी माता सुरलोके महीयसे ।

ग्रासमुष्टिर्मया दत्ता सुरभे प्रतिगृह्यताम् ॥

**गो प्रदक्षिणम्**

प्रदक्षिणं करोमि त्वां सर्वदेव स्वरूपिणीम् ।

सर्व पाप प्रशमनं सर्वमङ्गलदायिनीम् ॥

While showing**आरति**

न तत्र सूर्यो भाति न चन्द्र तारकम्

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमदं विभाति ॥

**अनुग्रह प्रार्थना Seeking blessings**

स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं ।

बलम् आयुष्यं तेज आरोग्यं देहि मे परमेश्वर/परमेश्वरि ॥

**नमस्कार स्तुतिः** *While doing namaskāram*

सर्वमङ्गलमाङ्गल्येशिवेसर्वार्थसाधिके ।

शरण्येत्र्यम्बकेदेविनारायणिनमोस्तुते ।।

**निवेदन स्तुतिः**

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।

त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

**अहिंसा व्रतम्**

अहिंसा परमो धर्मो अहिंसा च परन्तपः ।

अहिंसा परमं ज्ञानमहिंसा परमं फलम् ॥

**एकश्लोकीरामायणम्**

आदौ रामतपोवनाभिगमनं हत्वा मृगं काञ्चनम्

वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।

वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनम्

पश्चाद्रावणकुम्भकर्णहननं एतद्धि रामायणम् ॥

## एकश्लोकीमहाभारतम्

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम्

द्यूते श्रीहरणं वने विहरणं मत्स्यालये वर्धनम् ।

लीलागोग्रहणं रणे वितरणं सन्धिक्रियाजृम्भणं

भीष्मद्रोणसुयोधनादिमथनं एतन्महाभारतम् ॥

## एकश्लोकीभागवतम्

आदौ देवकीदेविगर्भजननं गोपीगृहे वर्धनम्

मायापूतनाजीवितापहरणं गोवर्धनोद्धारणम् ।

कंसच्छेदनकौरवादिहननं कुन्तीजसत्पालनं

श्रीमद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥

## श्रीमद्भागवतम्

१. तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।

क्षेमं न विन्दन्ति विना यदर्पणंतस्मै सुभद्रश्रवसे नमो नमः ॥

२. यं ब्रह्मा वरुणेन्द्र-रुद्र-मरुतः स्तुन्वन्ति दिव्यैस्तवैः
वेदैस्साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थित तद्गतेन मनसा पश्यन्ति यं योगिनः
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

## एकश्लोकी देवी भागवतम्

या चण्डी मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षण चण्डमुण्डमथिनी या रक्तबीजासनी ।
शक्तिः शुम्भनिशुम्भदैत्यहारिणी या सिद्धलक्ष्मीपरा
सा दुर्गा नवकोटिमूर्तिसहिता मां पातु विश्वेश्वरी ॥

## एकष्लोकी स्वयञ्ज्योति ब्राह्मणं(बृहदारण्यक)

किं ज्योतिस्तवभानुमानहनि मे रात्रौ प्रदीपादिकम्
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्तस्य निमीलनादि समये किं धीर्धियो दर्शने
किं तत्त्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥

## एकश्लोकी गीता

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।

तत्र श्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥

## भगवद्गीता

१. अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।

निर्ममोनिरहङ्कारःसमदुःखसुखःक्षमी ॥१२.१३.

2. यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।

तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १८.७८

3.ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनस्तिष्ठति ।

भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ १८.६१

## चिरञ्जीवि ध्यानम्

अश्वत्थामो बलिर्व्यासो हनुमांश्च विभीषणः ।

कृपः परशुरामश्च सप्तैते चिरञ्जीविनः ॥

## *Temple*प्रदक्षिणम्

प्रदक्षिणत्रयं कृत्वा नमस्कारांश्च पञ्च च ।

पुनः प्रदक्षिणं कृत्वा पुनर्जन्म न विद्यते ॥

प्रकृष्ट पापनाशाय प्रकृष्ट फल सिद्धये ।

प्रदक्षिणं करोमीश प्रसीद परमेश्वर ॥

## आत्मप्रदक्षिणम्

१. यानिकानि च पापानि जन्मान्तरकृतानि च ।

तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ॥

२. तव तत्त्वं न जानामि कीदृशोऽसि महेष्वर ।

यादृशोऽसि महादेव तादृशाय नमो नमः ॥

## स्वस्ति वचनम्

१. सर्वेषांस्वस्तिर्भवतु। सर्वेषांशान्तिर्भवतु ।

सर्वेषां पूर्णंभवतु। सर्वेषांमङ्गलंभवतु।

मङ्गलंभवतुमङ्गलंभवतुमङ्गलंभवतु॥

२.स्वस्ति प्रजाभ्यः परिपालयन्तां

न्याय्येन मार्गेण महीं महीशाः ।

गोब्राह्मणेभयः शुभमस्तु नित्यं

लोकाः समस्ताः सुखिनो भवन्तु ॥

३.काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।

देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः ॥

४.सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।

सर्वे भद्राणि पश्यन्तु माकश्चिद्दुःखभाग्भवेत् ॥

५.दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात् ।

शान्तो मुच्येत बन्धेभ्यः मुक्तश्चान्यान्विमोचयेत् ॥

६.सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।

सर्वस्सद्बुद्धिमाप्नोतु सर्वः सर्वत्र नन्दतु ॥

७.यः शिवो नाम रूपाभ्यां या देवी सर्वमङ्गला ।

तयोः संस्मरणात् पुंसां सर्वतो जय मङ्गलम् ॥

## अपराध क्षमा प्रार्थनाfor the day

१. अपराध सहस्राणि क्रियन्तेऽहर्निशं मया ।

दासोऽहमिति मां मत्वा क्षमस्व पुरोषोत्तम ॥

२. करचरणकृतं वाक्कायजं कर्मजं वा

श्रवणनयनजं वा मानसं वाऽपराधं ॥

विहितमविहितं वा सर्वमेतत्क्षमस्व

जय जय करुणाब्धे श्री महादेव शम्भो ॥

३. आवाहनं न जानामि न जानामि विसर्जनम् ।

पूजाविधिं न जानामि क्षमस्व परमेश्वर/परमेश्वरि ॥

४. मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वर ।

यत्पूजितं मया देव परिपूर्णं तदस्तु ते ॥

५. अन्यथा शरणं नास्ति त्वमेव शरणं मम ।

तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर/महेश्वरि ॥

**सर्वदेव नमस्कारः**

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।

सर्वदेव नमस्कारः केशवं प्रतिगच्छति ॥

*While receiving* प्रसादम्

तव पादार्पितं पुष्पं यत्पुष्पं शिरसावहेत् ।

कोटिजन्म कृतं पापं मुच्यते नात्र संशयः ॥

*While receiving* तीर्थम्

अकालमृत्यु हरणं सर्वव्याधिनिवारणम् ।

समस्तदुरितोपशमनं देवपादोदकं पावनं शुभम् ॥

*At the end of the teaching session*

१. यदक्षर-पद-भ्रष्टं मात्राहीनं तु यद्भवेत् ।

तत्सर्वं क्ष्म्यतां देव नारायण नमोऽस्तुते ॥

२. विसर्ग-बिन्दु-मात्राणि पद-पादाक्षराणि च ।

न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ।

## शिवसङ्कल्प सूक्तम् –

यज्जाग्रतो दूरमुदैतु देवं, तदु सुप्तस्य तथैवैति ।

दूरङ्गमं ज्योतिष्यां जातिरेकं, तन्मे मनः शिवसङ्कल्पमस्तु॥1॥

येन कर्माण्यपसो मनीषिणो, यज्ञे कृण्वन्ति विदथेषु धीराः ।

यदपूर्वं यक्षमन्तः प्रजानां, तन्मे मनः शिवसङ्कल्पमस्तु॥2॥

यत्प्रज्ञानमुत चेतो धृतिश्च,यज्जोतिरन्तरमृतं प्रजासु ।

यस्मान्न ऋते किञ्चन कर्म क्रियते, तन्मे मनः शिवसङ्कल्पमस्तु॥3॥

येनेदं भूतं भुवनं भविष्यत्, प्रिगृहीतममृतेन सर्वम् ।

येन यज्ञस्तायते सप्तहोता, तन्मे मनः शिवसङ्कल्पमस्तु॥4॥

यस्मिन्नृचः साम सजूꣳषि, यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।

यस्मिꣳश्चित्तꣳसर्वमोतं प्रजानां,तन्मे मनः शिवसङ्कल्पमस्तु॥5॥

सुषारथिरश्विनिव यन्मनुष्यान् , नैनीयतेऽभीशुभिर्वाजिन इव ।

हृत्प्रतिष्ठं यदजिरं जविष्ठं, तन्मे मनः शिवसङ्कल्पमस्तु॥6॥

ओं तत् सत्

www.arshaavinash.in

**WEBSITE FOR FREE E-BOOKS ON VEDANTA & SANSKRIT**

**Pujya Swami Dayananda Saraswati launched Arsha Avinash Foundation's website www.arshaavinash.in on Dec 31, 2014.**

**All the E-books available on the website can be downloaded FREE!**

**PUJYA SWAMI DAYANANDA SARASWATI- A BRIEF BIOGRAPHY BY N. AVINASHILINGAM. It is available in English, Tamil, Hindi, Japanese and Portuguese.**

**SWAMI PARAMARTHANANDA'S TRANSCRIBED CLASS NOTES: Available class notes are Introduction to Vedanta, Tattva Bodha, Bhagavad Gita (3329 pages), Isavasya Upanisad, Kenopanisad, Kathopanisad, Prasna Upanisad, Mundaka Upanisad, Mandukya Upanisad with karika, Aitareya Upanisad, Chandogya Upanisad, Brihadarnyaka Upanisad (1190 pages), Kaivalya Upanisad, Brahma Sutra (1486 pages), Atma Bodha, Vivekachudamani (2038 pages), Panchadasi, Manisha Panchakam, Upadesha Saara, Saddarsanam, Jayanteya Gita, Jiva Yatra, Dhanyastakam, Advaita Makaranda, Dakshinamurthy Stotram, Drg Drsya Viveka, Niti Satakam, Vairagya Satakam, Naishkarmya Siddhi, etc.**

**BRNI MEDHA MICHIKA'S BOOKS ON SANSKRIT GRAMMAR: Enjoyable Sanskrit Grammar Books- Basic Structure of Language, Phonetics & Sandhi, Derivatives (Pancavrttayah), Dhatukosah, Astadhyayi, Study Guide to Panini Sutras through Lagu Siddhanta Kaumudi, Sanskrit Alphabet Study Books- Single Letters, Conjunct Consonants.**

**There are many more books and articles on Indian culture and Spirituality, Chanting, Yoga and Meditation. There are also books in Tamil on Vedanta.**

**Arsha Avinash Foundation**
**104 Third Street, Tatabad, Coimbatore 641012, India**
**Phone: +91 9487373635**
**E mail: arshaavinash@gmail.com**
**www.arshaavinash.in**